गाहिपर्वतकास्तत्र वनषंडे तासां उत्कृष्टिणीनामपांतरालेषु तत्र तत्र देशे तस्य देशस्य च बहवः उत्पातादिपर्वताः जीवाभिगमोक्त
क्रीडार्थमायांत्यपि तेषु चोत्पातपर्वतेषु बहवो व्यंतरा देवा देव्यश्च क्रीडानिमित्तं वैक्रियशरीरमारचयंति अन एव तत्क्री
डापर्वतका उच्यंते तत्र चैकैकस्मिन् क्रीडापर्वते महांतः केचित्प्रासादाः तेषु च प्रासादेषु मध्ये प्रत्येकमेकैक

जं॰ब्रा॰१

मासनं पर्यंकासनं क्वचिद्धंसासनं क्वचिद्द्रुमासनं क्वचिद्भद्रासनं क्वचिन्मकरासनं क्वचित्सिंहासनमित्यादि तथाऽपरमप्याह
घरगा इति तत्र वनषंडे गृहकाणि वक्ष्यमाणानि विवक्षितस्य वनषंडस्य मध्ये तत्र तद्देशे तस्मिंदेशे च सर्वरत्नमयानि ना
नाप्रकाराणि गृहकाणि ज्ञातव्यानि तद्यथा क्वचित्कदलीगृहकं क्वचित्केतकीगृहकं क्वचिल्लतागृहकं क्वचित्प्रेक्षणकगृ
हं क्वचिदवस्थानगृहकं क्वचिन्मज्जनकगृहकं क्वचिन्मंडनकगृहकं क्वचिन्मोहनगृहकं क्वचित्कुसुमगृहकं क्वचिच्चित्रप्रधा
नगृहकं क्वचिद्गीतनृत्याभ्यासयोग्यं गंधर्वगृहकं क्वचिदादर्शगृहकं क्वचिज्जालकगृहकं क्वचिच्छालाप्रधानगृहकमित्या
दि एतेषां गृहकाणां मध्ये प्रत्येकमेकैकसंख्य रकानि तन्निवासिदेवजनयोग्यानि सर्वरत्नमयानि नानाप्रकारा
णि हंसासनगरुडासनप्रमुखान्यासनानि। संतीति च अथापरमपि यथा मंडवगा इति मंडपकाः तस्य वन

घरगा इं मंडवगा पुढविसिलाप ट्टगाय गोयमा तत्थ णं बहवे वाणमंतरा देवा॥

षंडस्य मध्ये तत्र देशे प्रदेशे च सर्वत्र। रत्नमया अनेके मंडपका ज्ञातव्या इत्यर्थः तत्रापि क्वचिज्जाति
मंडपकः क्वचिन्मालतीमंडपकः क्वचिन्म ल्लिकामंडपकः क्वचिन्नवमालिकामंडपक इत्यादि च अथ
चैतेषु मंडपेषु पुनर्यद्वर्त्ति तदाह पुढविसिलापट्टगा य त्ति एतेषु मंडपेषु मध्ये रत्नमयासनानि अनेकाकारेण कनक
मयाः पृथिवीशिलापट्टकाः ज्ञातव्याः चकारात् सस्तुश्च ये तेषु केचिद्धंसासनसंस्थिताः केचिद्भद्रासनसंस्थिताः केचि
न्मकरासनसंस्थिता इत्यादि एतत्सर्वं जीवाभिगमोक्तानुसारेण दिग्मात्रतो दर्शितं इह च अथैतेषु वा
नपर्वतादयः प्रायः केषां भोग्याः इत्याह तत्थ णं बहवे इत्यादि तत्रैतेषु उत्पातपर्वतगतहंसासनादिषु यावन्नानारू
पसंस्थानसंस्थितपृथ्वीशिला पट्टकेषु णमिति प्राग्वत् प्रागुक्तोपार्जितपुण्योपचया बहवो वानमंतरा देवा॥

देवा यथासुखमासते शेरते दीर्घकायप्रसारणेन न तु निद्रां कुर्वंति तेषां देवयोनिकतया तस्याभावात् उपलक्ष
णात् चिट्ठंति निसीयंति तुयट्टंति रमंति ललंति मोहंति पुरापोराणाणं सुचिण्णाणं सुपरिक्कंताणं सुभाणं कल्लाणाणं कड
डाणं कम्माणं कल्लाणं फलवित्तिविसेसं पच्चणुभवमाणा विहरंति इत्यस्यार्थः तत्र तिष्ठंति ऊर्ध्वस्थानेन निषीदंति उपविशंति त्वग्व
र्त्तयंति वामपार्श्वतः परावृत्य दक्षिणपार्श्वेनावतिष्ठंते दक्षिणपार्श्वतो वामपार्श्वेनावतिष्ठंत इति भावः रमंते रतिं
मावध्नंति ललंति मनईप्सितं यथा भवति तथा प्रवर्त्तंत इति भावः क्रीडंति यथासुखमितस्ततो गमनविनोदेन गीतनृत्यादिवि
नोदेन वा अवतिष्ठंते मोदंति मोहनसेवां कु र्वंति एवं प्रकारेण पुरापुराणानां इति पुरा पूर्वं मनुष्यभवे इत्यर्थः
पोराणानां चिरंतनानां सुचीर्णानां सुचरितानां इह सुचरितजनितकर्मापि कार्ये कारणोपचारात् सुचरि

देवीओ य आसयंति सयंति ता। सेणं जगईए उप्पिं अंतो पउमवरवेइआए

तमिति विवक्षितमिति तात्पर्यार्थः विशिष्ट तया तथा विधधर्म्मानुष्ठानविषयाऽप्रमादकरणं तस्मात् सुप
विनजनितानां सुपराक्रांतानां अत्रापि कार्ये कार णोपचारात् सुपराक्रांतजनितानि सुपराक्रांतानीत्युक्तं भवति
शुभफलमयमैत्रीसत्यतापणपरद्रव्यानपहारसुशीलादिरूपसुपराक्रमजनितानामित्यर्थः अतएव शुभानां शुभफला
नां इदं किं विवक्षितं शुभफलमपीडितमति विपर्य रसात् शुभफलमात्राति न तस्मात् विलक्षणं शुभफलमपि परमार्थमास्ये
यपर्यवसानमनात् कल्याणानीति कल्याणा रणीति कल्याणानां तुच्छस्यानघाविधविशिष्टफलदायिनां
अथवा कल्याणानामनर्थोपशमकानां णां कृतानां कर्मणां फलवृत्तिविशेषं प्रत्युतत्वेनानुभवं
त्यायातं इति एवं पद्मवरवेदिकाया रवेदिर्यावनषं दत्मक च्च्वनोक्ता संप्रतितस्या एव प

पद्मवरवेदिकाया अर्वाक् जगत्या उपरि यो वनषंड स उदकत्वान्मणितृणशब्दवर्जित तीसे णं जगईए इत्यादि तस्या जगत्याः उपरि पद्मवरवेदिकाया अंतर्मध्येऽत्र महानेको वनषंडः प्रज्ञप्तः देसूणाइं दो जोयणाइं इति देशोने अर्द्धतृतीयधनुः शतोने द्वे योजने विष्कंभेन वेदिकासमः परिक्षेपेण वर्णकमविरुद्धं किण्हे जाव तणविहूणोत्ति वर्णको यावत्तृणविहीनः यावत्करणात् बहिर्वनषंडवन्निरवशेषं वक्तव्यं नवरं तृणविहीनः दंत्यासावदंत्यासावविशेषणालावे विशिष्टस्याप्यलाभ इति वचनात् तेऽत्र मणिभिः जनवाद्यमानवेणुवीणामृदंगध्वनेरपि तिरस्कारप्रवणेन ध्वनिना विशिष्टानि यानि तृणानि तैर्विहीनः अन्यास्त्वत्र वर्णकइतिगमं तत्रत्यवृक्षपत्रसंहतिप्रच्छन्नत्वात् तेषां शब्दस्यैव निषेधात् यदुक्तं श्रीजीवाभिगमवृत्तौ वृक्षवनं तणसद्दविहूणो णेअव्वोत्ति एतदनंतरोक्तदेशावस्था

एत्थ णं एगे वणसंडे पन्नत्ते देसूणाइं। दो जोयणाइं विक्खंभेणं वेइयासमे परिक्खेवेणं किण्हे जाव तणविहूणो णेयव्वो ॥ छ

सर्वं बहिर्वनषंडवद्विशेषेण वक्तव्यं नवरमत्र मणीनां तृणानां च शब्दो न वक्तव्यः पद्मवरवेदिकांतरितत्वात् तथा तथाविधवातालाभतो मणीनां तृणानां च चलनाभावेन परस्परं संघर्षणाभावात् तथा वाद वणसंडवण्णओ सद्दवज्जो जावविहरंतित्ति नन्वत्र अंतरपद्मवरवेदिकाया बहिर्वनषंडवर्णनाधिकारे तृणानामिव मणीनामपि वर्णगंधस्पर्शवद्विशेषेण ध्वनिरप्यभिहितः सांप्रतमर्वाचीनवनषंडे तृणानामेव शब्दाभिलापनिषेधो न मणीनां तत्कथमिदापि मणीनां ध्वनिर्मा भूदिति विकल्पेवं तृणानां तथाविधध्वनिनिषेधमणीनामपि तन्निषेधस्यावश्यं ज्ञातव्यत्वात् यथा वायोरभिघातः कारणस्य वातजन्य परस्परसंघर्षणाद्युपस्यानिलाभिघातस्यालव्यात्यवेति॥

सिद्धं तृणानां ध्वनेरभावे मणीनामपि ध्वनेरभाव इति यथाऽस्य प्रदेशे समुद्रतिकायो न्यूनावस्तुतोऽपि ध्वनिर्न भवति इत्यादिः धान्येव यथा जिनवचनप्रामाण्यसामान्यप्रायः सूत्रपाठेऽपरसूत्राणि सापेक्षाणीति तत्तत्तणविहूणोत्तिसूत्रात्रजीवाभिगमसूत्रात्सापेक्षं तणसद्दविहूणोत्तितद्वाक्यं सम्यक्तत्त्वमादेयं तत्र सद्दविहूणो इत्यपिपाठोऽत्र द्रष्टव्यः तेनैतच्चैवं वर्णनविशेषणमिति च अथ जंबूद्वीपस्य कति द्वाराणीति पृच्छति जंबुद्दीवस्स णमित्यादि जंबूद्वीपस्य णं द्वीपस्य भदंत कति द्वाराणि प्रज्ञप्तानि भगवानाह गौतम चत्वारि द्वाराणि प्रज्ञप्तानि अथ तेषां नामान्याह विजयादि द्वारचतुष्टयमिति तत्र विजयादिक्रमेण पूर्वादिदिक्षु विजयादयः तेषां प्रत्येकं च अद्यदिगविजयप्रवृत्तेर्विजयः विजयंतीति वैजयंते जयंती

जंबुद्दीवस्स णं भंते दीवस्स कइ दारा पन्नत्ता गोयमा चत्तारि दारा पन्नत्ता तं विजए वेजयंते जयंते अपराजिए॥ कहि णं भंते जंबुद्दीवस्स दीवस्स विजए णामं दारे पन्नत्ते गोयमा जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरत्थिमेणं पणयालीसं जोयणसहस्साइं वीतिवइत्ता जंबुद्दीवे दीवे पुरत्थिमपेरंते लवणसमुद्दस्स पुरत्थिमद्धस्स पच्चत्थिमेणं सीआए महानईए उप्पिं एत्थ णं॥

ते च जयंते च अपराजितं चेति च अथ तत्र प्रथमं विजयद्वारं क्वास्तीति पृच्छति कहि णं भंते इत्यादि क्व भदंत जंबूद्वीपस्य द्वीपस्य विजयं नाम तिविजयोपलक्षितं द्वारं प्रज्ञप्तं भगवानाह गौतम जंबूद्वीपे द्वीपे मंदरस्य पर्वतस्य पूर्वस्मिन् दिग्भागे सर्वासामपि दिशामपि सर्वाः पंचचत्वारिंशतं योजनसहस्राणि व्यतिव्रज्यातिक्रम्य योजंबूद्वीपस्य पूर्वस्मिन् पर्यंते तत्र सर्वपर्यंतः लवणसमुद्रस्य पूर्वार्धस्य पश्चिमेन पश्चिमदिग्भागे शीतायां महानद्या उप्पिंति उपरि एत्थ णंति एतस्मिन् प्रदेशे॥ ३३

जंबूद्वीपस्य विजयं नाम द्वारं प्रज्ञप्तं तच्चोर्द्ध्वमुच्चत्वेन अष्टौ योजनानि चत्वारि योजनानि विष्कंभेन तावइस्रं ति ताव-
देव चत्वारि योजनान्येव प्रवेशेन सेए त्ति श्वेतं बाहुल्येनांकरत्नमयत्वात् वरकणगागत्ति वरकनकप्रधानकनकमयी
स्तूपिका शिखरं यस्य तत्तथा उक्तं च प्राकृतत्वात् जाव दारस्स वण्णओ त्ति यावद्द्वारस्य वर्णकः स च जीवाभिगमोक्त इहापि
वक्तव्यः तथाहि ईहामिगउसभतुरगनरमगरविहगवालगकिंनररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्त
ईहामृगादीनां चित्रमालेखो यत्र तत्तथा तत्र ईहामृगा वृकाः व्याला श्वापदादयः प्रतीता एव खंभुग्गयवयरवेइयापरिग-
याभिरामे स्तंभोद्गतया स्तंभोपरिविनिर्मिता वज्र- रत्नमय्या वेदिकया परिगतं सद्यदभिरामं तत्तथा विद्याधरजम-

जंबुद्दीवस्स विजए णामं दारे पण्णत्ते । अट्ठ जोयणाइं उड्ढंउच्चत्तेणं चत्तारि जोयणाइं विक्-
खंभेणं तावइयं चेव पवेसेणं॥ सेए वरकणगथूभियाए जाव दारस्स वण्णओ॥

लजुअलजंतजुत्तेइव विद्याधरयोर्यमल- युगलं समश्रेणिकं स्वाउरूपं यंत्रं तद्युक्तमिव संचरिष्णु-
तिमाद्वयरूपं तेन युक्तमिव तथा अच्चिसह- स्समालिणीए अर्चिषां किरणानां सहस्रैर्मालनीयं परिवारणीयं
यद्द्वारं रूपाणां संलाबनाजायानि तत्तथा स्यालाविकाश्रिः सहस्रदायो एतं किं विशिष्टविधानक्रिमतु रूपविशेषप्रपंचव-
तुक्तं तथा रूपकसहस्रकलितं भिसिमाणे दीप्यमानं भिब्भिसिमाणे अतिशयेन दीप्यमानं चक्खुल्लोअणलेसे च-
क्षुः स्वर्ष्टृतं लोकने लिशतीव श्लिष्यतीव यत्र तत्तथा सुहफासे सुखः कोमलः स्पर्शो यस्य तत्तथा सस्सिरीयरूवे सश्री-
कं रूपं यस्येति एवंविधस्य विजयद्वारस्य वज्रमया नेमा नेमानाम भूमिभागादूर्ध्वं निष्क्रामतः प्रदेशाः रिष्टरत्नमया मूलपा-
दाः वैडूर्यरत्नमयाः स्तंभाः सुवर्णमणिरत्ननिबद्धं भूमितलं हंसगर्भरत्नमयाद् एलुगा गोमेयरत्नमय इंद्रकीलकः लो-

हिताक्षरत्नमय्यौ द्वारशाखे ज्योतीरत्नमयं द्वारस्योपरि तिर्यग्व्यवस्थितं फलकं निस्थिडातिनिविशेषो वैडूर्यरत्नमयौ क-
पाटौ लोहिताक्षरत्नमय्यः सूचयः ताश्च फलकद्वयसंबंधविघटनाभावहेतुकाः पादुकास्थानीयाः वज्ररत्नैः पूरिताः परस्प-
रसंबंधिनां फलकानां संधयः नानामणिमयानि समुद्गका शलाकादिनिर्मलिका गवाक्षाणि वज्ररत्नसंबंधिनी अर्गला अर्गल-
पाशा अर्गलाप्रासादो नाम यत्रार्गला नियम्यते रत्नमय्यः आवर्तनपीठिकाः नाम इंद्रकीलिकास्थानीयानि अंकरत्नमया
उत्तरपार्श्वाः तथा द्वारस्योभयोः पार्श्वयोः भित्तयः इह पंचाशतो भित्तिगुलिकाः ताश्च पीठकसंस्थानीयाः तावत्प्रमाणगुलिके-
तावत्प्रमाणाः शय्याः लीलावस्थितशालभंजिकाः वज्रमयो माडंबला गकिन्नरजतमयं शिखरं एतच्चद्वारशिख-
रापेक्षया तिलं तपनीयमयमुपरितनभागः र- त्नामणिरत्नमया गवाक्षाः अंकरत्नमयाः पक्षाः तेऽदारस्पे

कदेशाः ज्योतीरसमयाः प्रवालाः रूपवंशाः तिर्य- रवोलयतः छाद्यमानावंशाः कवेलुकानि वंशानामुपरि रत्नमय्यः
पट्टिकाः ताश्च वंशानामुपरि कंबास्थानीयाः जा- तरूपमय्योऽवघाटन्यः ताश्चाच्छादनहेतुकं बोपरिस्थाप्यमानाः
महाप्रमाणाः कलिंबस्थानीयाः वज्ररत्नमय्योऽवघाटनीनामुपरिपुंछन्यः नाम्ना निबिडतराच्छादनहेतुलक्षणविशेषस्था-
नीयाः पुंछनीनामुपरि कवेलुकानां चाधस्तात् सर्वश्वेतरजतमयमाच्छादनं तथा तिलकार्द्धवंशादिचित्रतरकं तर्व-
हिरण्मयं तपनीयबालुकाविस्तारयुक्तः सुखस्पर्शं सश्रीकरूपमित्यादि द्वारवर्णकं तथा विजयद्वार-
उल्लंकारकर्णिकाः वस्तूनि यथा उभयोः पार्श्वयोर्द्विधा निषीधिकायां निषीदनस्थाने तस्याविदेवं दनकलः
शापरिपाट्या निवेदलशाः सुरभिवरवारिपरिपूर्णाः कवाटापितवन्कमत्ताः वंदनवर्तिताः पद्मोत्पलपिधानाः कम

कं ह्रा ४

प्रतिष्ठाना पद्मेन्द्रनीलसमानाः सर्वरत्नमया स्वर्णाद्यादिविशेषणा निर्माणवत् च तथा विजयस्य द्वारस्योभयोः पार्श्वयो
रः कल्पवृक्षविशिष्टाः अनेकदिव्यनागदेवपरिवारोपगताः तत्र नागदेवाश्चन्द्रवाः तेषु रुक्मजालान्तरेषु लम्बमानसु
वर्णमयदामसमूहाः गवाक्षान्तरेषु विराजमानमालासमूहाः क्षुद्रघण्टिकासमूहैश्च सर्वतो व्याप्ताः तिर्यगनिलेरिता
घोषैर्नानागन्धवलातनपरिमलानाः अतिमनोरमनाः अधोभागपत्रगर्भवदतिसरला दार्शोर्गजदन्ताकर
राः सर्वाभिनावरमयाः अन्याद्यादिनिर्माणवत् च तथा तेषु नागदन्तेषु वदवाः सप्तरत्नविचित्रकुवलयेवमानाः पुष्पमा
लासमूहाः वदवोनीलरत्नवद्धमाल्यदामकाः ॥ लायाः एवं लोहितदारिद्रपद्मरत्नवद्धाश्चपिवाभ्यां च तानिव
दामानि तपनीयलम्बसदृशानि लम्बमान रनामदामानि मणिमयाङ्गलम्बमानानि गालकादितिमण्डनविराज

षः तथा सुवर्णपत्रमण्डितानि नानामणिरत्न विचित्रहारार्धहारोपशोभितसमुदायानि ईषदन्योन्यमसं
लग्नानि सर्वादिदिगागतैर्वातैर्मन्दमन्दमेजिता निर्धूपितानि चालितानि परस्परसंघर्षणेन उदारमनोज्ञैः श
ब्दैः जनश्रोत्रमनोनिर्हर्षितकर्तेषु वाद्यैर्यक्तानि सुखोत्पादकानि सर्वास्वपि दिक्षु अन्यासन्नानादशान्त्राणे वा प्रसरन्ति अ
नावापरशोरमानानि तिष्ठन्ति च तथा तेषां नागदन्तानामधः परि अनेकदिव्यनागदेवपरिवार्योपगत तत्र नागदन्तकाः सा
दुरुहनागदन्तका इव यावद्वज्रदन्तसमानाः प्ररूढाः तेषु च नागदन्तकेषु वद्धनिरूतमयानि सिक्थकानि सिक्थकेषु वै
दूर्यरत्नमया धूपघटिकाः ताश्च कृष्णागरुप्रज्वलिताः उदारेणानन्तनतः प्रमते न च गन्धेन घ्राणमनोनिर्हर्षितकारणाः प्रेता
निवासाः च तथा विजयस्य द्वारस्योभयपार्श्वे [illegible] देवदासीलक्षत्रिशत्परिवारोपगतस्य ३७

नाउ विजयस्य द्वारस्योभयोः पार्श्वयोः एकैकस्मिन्नैषेधिकीसन्निवेशे द्विरष्टकाः तासां तेषां षोडश शालभञ्जिकापरिवारे
ष्ट्रमे ता शालभञ्जिकाः किंलक्षणा इत्याह लीलास्थिताः लीलयापालिङ्गितानि वेशाभूपयाह्विताः सुप्रतिष्ठिताः सुमनो
तया प्रतिष्ठिताः सुअलङ्कृताः सुकृत्वा शास्त्रेण रमणीयत्या अलङ्कृताः नानाविधरागवसनाः नानाविधनानाप्र
काराः रागोपेताः देवश्यानि वसनानि वस्त्राणि संहृतन्यायाः तासां नानाविधाः मृदुपिलवाउ नानाविधपाणिमाल्यानि पिनद्धा
नि याविदानिया मात्मन्त्रधा प्रतिगृह्य मध्ये [illegible] मध्यमा गोपायासां तासां मध्या श्यामेलगरुमलक्ष
अलवहि [illegible] पीनरचितसंस्थाने पकास्यातो पीनरचितसंस्थानौ श्यामलकस्या
पीउः [illegible] श्रेणीकंपयत्र मलं तद्दशितो वद्धसनावाअपवितद्ध विनताः

वा विनिवाः एवंविध्यैवास्फटनैवपीनरविनै २ पयोधरोयासांतामस्याग्रोवंगाउ रक्तापांगोनयनोपानकाः
णेयासां तासां मध्या श्यामिश्चकेसाउ च्यसिताः कृस राक्षेशायासां तासां मध्या मिउविस्यपसवलस्यर्दलासं वेश्चिसगसि
रयाउमृदवः सुक्ष्मारा विशदा निर्मलाः प्रशस्तास्फटिकवप्रनतानिलसृणानि येषां तेषां श्यामलक्षणाः संवेष्टितं संह
तमग्रं शेखरकं करणा येषां तेसां वेष्टिताग्रा एवंविधाः शिरोजाः केशायासां तासां मध्या ईसिंश्रसोगवरपादपसंप्रतिष्ठिता उ ई
षन्मनागशोकवरपादपे संप्रतिष्ठिता आश्रिताः तथा वामहस्तगृहीतस्यग्रसालाउ वामहस्तेन गृहीतं मग्र शालायाः शाख
रयाः अर्धदशोकवरपादपस्य यकातिस्यासां तासां ईसिंश्रवृक्षिकमस्कवेष्टिपदिं श्रसेमानाउ इव अर्धतिर्यक्वलितमक्षिप
उकटाक्षरूपेण विशितवाते श्रसेमानाउ इव ब्रिसंत्यइव सुरजनानां मनांसि वरुणालोकस्थाणालोसदि श्रसमसं

जं॰प्रा॰टी॰

खिद्यमाणाउविव अन्योन्यं परस्परं वल्गूनां लोकानां नयनलेश्याः संश्लेषात्खिद्यमाना इव दृश्यंते भवति एवं नामेति यत्कि-
वलितास्तत्कटाक्षैः परस्परं खिद्यंत इवेति दृष्टिवापरिणामताः शाश्वतभावमुपागताः चंद्राननाः चंद्रविलासिन्यः चंद्रा-
र्द्धसमललाटाः चंद्रादप्यधिकसोमदर्शनाः उल्का इवोद्योतमानाः अनाहतसूर्यतेजःप्रकाशाः शृंगारागारचारुवेषाः
प्रासादीयाः दर्शनीयाः अभिरूपाः प्रतिरूपाश्च तथा विजयद्वारस्योभयोः पार्श्वयोः द्विप्रकारायामपि नैषेधिक्यां द्वौ द्वौ
जालकटकौ इह जालकटको नाम जालकाकीर्णो रम्यसंस्थानः प्रदेशविशेषः ते च सर्वरत्नमयाः तथा विजयद्वारस्योभ-
योः पार्श्वयोः द्वे द्वे घंटापरिपाट्यौ तासां घंटानां जांबू नदमय्यः वज्रमय्यो लालाः नानामणिमया घंटापार्श्वाः तपनी-
यमय्यः शृंखला यास्तु ताश्चावलंबिता स्थिता इति रजतमय्यो रज्जवः ताश्च घंटा ओघस्वराः प्रवाहेणास्वरायाः

सांतास्तथा एवं मेघस्वराः हंसस्वराः क्रौंचस्वराः। सिंहस्वराः दुंदुभिस्वराः नंदिस्वराः द्वादशतूर्यसंघातो नंदिः
मंजुस्वराः उदारस्वराः सुस्वराश्च एवं तस्योः पा। र्श्वयोर्द्वे द्वे वनमालापरिपाट्यौ ताश्च वनमाला नानाद्रुमाणां नाना-
लतानां च यानि किशलयानि ये च पल्लवास्तैः समाकुलाः षट्पदपरिभुज्यमानकमलाश्रयाः सश्रीकाः यावत्प्रतिरूपाः च
तथा विजयस्य द्वारस्योभयोः पार्श्वयोः एकैकस्यां नैषेधिक्यां द्वौ द्वौ प्रकंठकौ प्रकंठको नाम पीठविशेषः ते चार्द्धक्रोशम
तेन आदर्शवृत्ताः पर्यंतावनतप्रदेशाः पीठाः प्रकंठा इति ते च प्रकंठाः चत्वारि योजनान्यायामविष्कंभाभ्यां द्वे योजने बा-
हल्येन सर्वात्मना वज्रमया अच्छा यावत्प्रतिरूपाः च तेषां च प्रकंठकानामुपरि प्रत्येकं २ प्रासादावतंसकः प्रासादावतं-
सको नाम प्रासादविशेषः वदंति त्वेवं प्रासादानामवतंसक इव शेखरक इव प्रासादावतंसकाः ते च प्रासादं ५०

चत्वारि योजनान्यूर्द्ध्वमुच्चैस्त्वेन द्वे योजने आयामविष्कंभाभ्यां तेषां च स्वरूपं यथा अभ्युद्गतोच्छ्रिता प्रासादाः अब्भुग्गयमूसियपह-
सिया अभ्युद्गता आभिमुख्येन सर्वतो विनिर्गता उच्छ्रिताः प्रबलतया सर्वासु दिक्षु प्रसृताः या प्रभा तया सिता इव बद्धा इव तिष्ठं-
तीति गम्यं अन्यथा कथमिवाऽनालंबा तिष्ठंतीति भावः विविधमणिरत्नभक्तिचित्राः विविधा अनेकप्रकारा ये
मणयश्चंद्रकांताद्याः यानि च रत्नानि कर्केतनादीनि तेषां भक्तिभिर्विच्छित्तिविशेषैश्चित्रा नानारूपा आश्चर्यवंतो वा योऽत्र तथा वा-
तोद्धूतविजयवैजयंतीपताकाछत्रातिच्छत्रकलिता वातोद्धूता वातकंपिता विजयसूचिका वैजयंतीनामानो याः पताकाः
: अथवा विजया वैजयंतीनां पार्श्वकर्णिकारूपा ततस्तत्प्रधाना वैजयंत्योऽपि जयवैजयंत्यः छत्रातिच्छत्राणि उपर्यु-
परिस्थितान्यातपत्राणि तैः कलिता युक्तास्तथा तुं- गा उच्चा उच्चैस्त्वेन चतुर्योजनप्रमाणत्वात् अत एव गगनत-

तलमनुलिखंतः शिखराः गगनतलमंबरतलं अ- नुलिखंति अभिलंघयंति शिखराणि येषां ते तथा जालंतररयण-
जालानि जालकानि यानि भवनभित्तिषु प्रतीतानि तदंतरेषु विशिष्टशोभानिमित्तं रत्नानि येषु ते जालांतररत्नाः पंज-
रोन्मीलिता इव पंजरादुन्मीलिता इव यथाहि किल किमपि वस्तु वंशादिमयप्रच्छादनविशेषाद्बहिष्कृतमत्यंतमविनष्टच्छा-
यत्वात् शोभते तथा तेऽपि प्रासादावतंसका इति तेषां शिखराणि मणिकनकमयानि विकसितशतपत्रसहस्रपत्रैश्च तिलकैरर्द्धचं-
द्ररूपाणि चित्राणि द्वारादिषु नानामणिमयानि दामानि तैश्चालंकृताः अंतर्बहिश्च श्लक्ष्णाः मसृणाः तपनीयमयवालु-
काविस्तृताः प्रस्तटाः सुखस्पर्शाः प्रासादीया दर्शनीया अभिरूपाः प्रतिरूपा इति तेषां च भूमिभागवर्णनं आलिंगपुष्कर इव स-
हिता जगतीवनखंडवर्णनमिवावसातव्यं तेषां प्रासादानां बहुमध्यदेशभागे प्रत्येकं मणिपीठिका ताश्च योजनमायामविष्कं-

MEMORIAL

तस्या मध्ये योजनं बाहल्येन सर्वात्मना रत्नमय्यो याः प्रतिरूपाः तासां च मणिपीठिकानामुपरि प्रत्येकं सिंहासनं तेषां च व-
जं.वृ.२। र्णकनिवेशस्त्वेवं रजतमयाः सिंहाः सुवर्णमयाः पादाः तपनीयमयानि चक्कलानि पादानामधःप्रदेशाः नानामणिमयानि
पादशीर्षकाणि पादानामुपरितनाऽवयवविशेषाः जाम्बूनदमयानि गात्राणि वज्ररत्नपूरिताः संधयः नानामणिमयं
वेच्चं वेच्चं नाम वानमित्यर्थः तानि ईहामृगादिभक्तिविशेषशोभितानि नानामणिरत्नमयपादपीठसहितानि सुकुमाराच्छादन-
युक्तानि नवनीतादिस्पर्शतोऽतीवमृदुस्पर्शानि अतिरमणीयेन रजस्त्राणेन संवृतानि तेषां च सिंहासनानामुपरि प्रत्येकं श-
रदविजलफेनसदृशो विजयदूष्यं नाम रत्नं तत्सर्वात्मना रत्नमयं स्वच्छं श्लक्ष्णमित्यादि विशेषणानि
प्राग्वत् तस्य विजयदूष्यस्य बहुमध्य- देशभागे वज्ररत्नात्मकोऽङ्कुशः अङ्कुशाकारस्तु कादामा-

लंबनाश्रयभूतः तत्र वज्रमयेऽङ्कुशे कुंभाग्र- परिमाणं मुक्तादाम प्रज्ञप्तं तच्च कुंभाग्रं मगधदेशप्रसिद्धकुंभ-
स्य परिमाणं तदर्द्धप्रमाणैरन्यैश्चतु- र्भिर्दामभिः सर्वतो दिक्षु संपरिक्षिप्तं एवं सर्वेष्वपि सिंहासनेषु
उपरिभागे दामानि वक्तव्यानि तानि च तपनीयलंबूसकानीत्यादि वर्णनं प्राग्वत् ॥ तथा विजयद्वारस्योभयोः पार्श्वयोर्द्वि-
धातो नैषेधिक्यां द्वौ द्वौ तोरणौ स्तः तानि च तोरणानि नानामणिमयानीत्यादि तोरणवर्णनं निरवशेषं वक्तव्यं तेषां तोर-
णानां पुरतो द्वे द्वे सालभंजिके सालभंजिकावर्णनं च प्राग्वत् तेषां तोरणानां च पुरतो द्वौ द्वौ नागदंतकौ ते च नाग-
दंतकाः मुक्ताजालांतरोच्छ्रिता इत्यादि वर्णकः प्राग्वत् परमत्रोपरि नागदंतका न वक्तव्यास्तेषामभावात् तेषां तो- ४१
रणानां पुरतो द्वौ द्वौ हयसंघाटौ गजसंघाटौ द्वौ द्वौ नरसंघाटौ किंपुरुषसंघाटावित्यादि नथादयाद्वा॥

नीपङ्क्तिवीथीमिथुनकानि चित्रे हयगोरथनयादत्तकान्यपि ज्ञातानि तानि वक्तव्यानि एवं पद्मलतादयो लताः चंदनकलशाः
प्राग्वत् वेदितव्याः तथा तेषां तोरणानां पुरतो द्वौ द्वावादर्शकौ तेषामादर्शकानामयं वर्णकनिवेशः तपनीयमयाः प्रकंठकाः
ग्रीवविशेषाः वैडूर्यमयाः वरुडा आदर्शगंडप्रतिबंधप्रदेशाः आदर्शगंडानामुपरि प्रक्षणयोग्याः प्रदेशा इत्यर्थः वज्ररत्नमयाः
संधाः नानामणिमयाः फलकाः अंकरत्नमयानि मंडलानि यत्र प्रतिबिंबसंभूतिः चंद्रमंडलसदृशा अपरिकर्मितसदोद्योता
अर्द्धकायप्रमाणाः तथा तेषां तोरणानां पुरतो वज्रनाभे स्थाले स्तः तानि च स्थालानि शुद्धस्फटिकवद्वैरिव स्फुटितैः शालि-
तंदुलैः पृथिवीपरिणामरूपैः पूर्णानि जांबूनदमयानि रथचक्रसमानानि महांति प्रज्ञप्तानीत्यादि प्राग्वत् तथा तेषां तो-
रणानां पुरतो द्वे द्वे पात्र्यौ ताश्च पात्र्यः नीयपयःपूर्णा नानाविधहरितफलपरिपूर्णा इव तिष्ठंति नवतरुले-

वत्फलानि किंभूता इत्याह शाल्ववनागवस्तुपम- ताः पृथिवीपरिणामाः सर्वरत्नमया इत्यादि प्राग्वत् एवं नानाविधप्र-
तोऽपि नानाविधवस्तुजातानि पृथिवीपरिणामरू- पाणि तिष्ठंतीति च तथा तेषां तोरणानां पुरतो द्वे द्वे मनो-
गुलिकानामानौ पीठिके तत्र च मनोगुलिकासु सुवर्णमयानि रूप्यमयानि च फलकानि तेषु च फलकेषु बहवो वज्रमयना-
गदंतकाः तेषु च नागदंतकेषु बहूनि रजतमयानि सिक्ककानि तेषु च बहवो वातकरकाः इत्यादि तथा तेषां तोरणानां पुर-
तो द्वौ द्वौ रत्नकरंडकौ निजप्रभाभिः प्रत्यासन्नवस्तुप्रकाशकौ स्तः च तथा तेषां तोरणानां पुरतो द्वौ द्वौ हयकंठौ हयकंठप्रमाणौ
रत्नविशेषौ एवं गजनरकिंपुरुषमहोरगगंधर्ववृषभकंठा अपि वाच्याः तेषु च कंठकेषु पुष्पमाल्यगंधचूर्णकवस्त्राभरणसिद्धार्थ-
कलोमहस्तकचंगेर्योऽपि वक्तव्याः एताश्च सर्वा अपि रत्नमय्योऽवगंतव्याः च तेषां तोरणानां पुरतो द्वे द्वे छत्रे तानि च

उ.चा.३। छत्राणि वैडूर्यरत्नमयविमलदंडानि जांबूनदमयकर्णिकानि वज्रसंधीनि अष्टसहस्रवरकांचनशलाकानि मलयोर्व
र्द्दरवरसुगंधशीतलछायानि अष्टमंगलभक्तिचित्राणि चंद्रमंडलदृशानि इत्यादिगतं च तथा तेषां तोरणानां
पुरतो द्वे द्वे चामरे तानि च चामराणि चंद्रकांतवैडूर्यादिरत्नखचितदंडानि क्षीरोदजलसमुद्रफेनपुंजसन्निभानि
रजतमयाग्रकेशदीर्घवालानि सर्वात्मनादिशागतं च तथा तेषां तोरणानां पुरतो द्वौ द्वौ तैलसमुद्गकौ एवं को
ष्ठादीनां समुद्गकावाच्याः सर्वेऽपि रत्नमयाः च तथा तस्मिन् विजयद्वारे अष्टशतं चक्रध्वजानां चक्रालेख्यरूपविज्ञापनाः
नां ध्वजानां एवं मृगगरुडछत्रपिच्छशकुनि । सिंहवृषभचतुर्दंतहस्तिपदलांछनविशिष्टानां ध्वजानामष्टशतं च
वक्तव्यं सर्वाग्रसंख्यया अशीत्यधिकं सहस्रं। सहस्रं भवतीति एवं विजयद्वारे नव भौमानि संति तत्रालोमस्त

२भ्यां विशिष्टस्थानानि भवंतीति तेषां च भौमानां । बहुमध्यभाग उपरितनाः सर्वे वक्तव्याः तेषां च भौमानां बहुम
ध्यदेशभागे यत्पंचमं भौमं तस्य बहुमध्यदेश। भागे विजयद्वाराधिपतेर्विजयदेवस्य योग्यं सिंहासनं प्रज्ञप्तम्
तद्वर्णनं प्राग्वत्सिंहासनवद्वक्तव्यं तस्य सिंहासनस्य वायव्योत्तरस्यामैशान्यां विजयस्य देवस्य सर्वेषां चतुर्णां सा
मानिकसहस्राणां चत्वारि भद्रासनसहस्राणि सर्वस्यां चतसृणामग्रमहिषीणां चत्वारि भद्रासनानि आग्नेय्यां अभ्यंत
रपर्षद्रूपाणामष्टानां देवसहस्राणां योग्यान्यष्टौ भद्रासनसहस्राणि दक्षिणस्यां मध्यमपर्षदो दशानां देवसहस्राणां
योग्यानि दश भद्रासनसहस्राणि एवं नैर्ऋत्यां बाह्यपर्षदो द्वादशानां देवसहस्राणां द्वादश भद्रासनसहस्राणि भद्रासनानि पश्चि ४२
मायां दिशि सप्तानामनीकाधिपतीनां योग्यानि सप्त भद्रासनानि तस्य सिंहासनस्य सर्वासु दिक्षु चतसृष्वपि विजयस्य देव

स्य षोडशानामात्मरक्षकदेवसहस्राणां योग्यानि षोडश भद्रासनसहस्राणि एवं शेषेष्वपि भौमेषु प्रत्येकं सिंहासनं स
परिवारं सामानिकादिदेवयोग्यभद्रासनरहितं दृष्टव्यं च तथा विजयस्य द्वारस्योपरितनाकारः कर्केतनादिभिः षोडशभी रत्नैरुपशो
भितः विजयस्य द्वारस्योपर्यष्टावष्टौ मंगलकानि नानाविधसर्वरत्नमयानीत्यादिगतं च अथ कस्मादेवमस्य द्वारस्य
विजयमितिनाम प्रवृत्तमिति जीवाभिगमोक्तं गौतमप्रश्नमाह सेकेणट्ठेणं भंते एवं वुच्चइ विजए णं दारे विजए णं
अमी विजए णं दारे विजए णामं देवे महिड्ढीए जाव महज्जुईए जाव महाणुभावे पलिओवमट्ठिईए परिवसति से णं
तत्थ चउण्हं सामाणिअसाहस्सीणं चउण्हं अग्ग महिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अणिआणं सत्त
ण्हं अणिआहिवईणं सोलसण्हं आयरक्ख देवसाहस्सीणं विजयस्स णं दारस्स विजयाए रायहाणीए

जावरा यहाणी॥

अन्नेसिं च बहूणं विजयरायहाणीवत्थव्वगा॥ णं देवाण य देवीण य आहेवच्चं पोरेवच्चं जाव दिव्वाइं भोगा
भोगाइं भुंजमाणे विहरति सेतेणट्ठेणं गोयमा एवं वुच्चति विजए दारे विजए दारे अदुत्तरं च णं गोयमा वि
जयस्स दारस्स सासए णामधिज्जे पण्णत्ते जन्न कयाइ णासी ण कयाइ णत्थि ण कयाइ ण भविस्सति जाव णिच्चे विजए
दारेत्ति अत्र देवाणय देवीणय पर्यंतसूत्रगमं प्राग्वत्समित्यादि तार्थरूजम्मादिमिच्छाय वसरे साहांसते तणिष्ठ मा
णाम्नैव ततैव स विस्तरं व्याख्यास्यामः च अथैवं जीवाभिगमोक्तं वर्णनमिहदर्शयित्वा वक्तव्यमिति ज्ञापनार्थमुक्तमा
सत्रमाह जाव रायहाणीति यावद्विजयायाः राजधान्याः तावद्वक्तव्यं तत्र प्रसंगतो दिग्मात्रेण राजधानीवर्णकोऽपि यथा
इह हि विजयस्य द्वारस्य पूर्वस्यां दिशि तिर्यगसंख्येयान् द्वीपसमुद्रानतिक्रम्यापरस्मिन् जंबूद्वीपद्वीपे द्वादशयोजनसह

जं॰प्र॰। दस्राण एवमाख्यातान विजयस्य देवस्य विजया नाम्ना राजधानी समस्ति सा च द्वादशयोजनसहस्राण्यायामविष्कंभाभ्यां सप्त
त्रिंशद्योजनसहस्राणि नवशतानि सप्तचत्वारिंशानि किंचिद्विशेषाधिकानि परिक्षेपेण तस्याश्च राजधान्याः समंततः प
रिक्षेपा सर्वकनकमयः प्राकारः स च सप्तत्रिंशद्योजनानि ऊर्द्धमुच्चैस्त्वेन विष्कंभेन तु मूले सार्द्धानि द्वादश
योजनानि मध्ये क्रोशाधिकानि षड्योजनानि उपरिष्टाच्चार्द्धक्रोशाधिकानि त्रीणि योजनानि बहिर्वृत्तोऽंतश्चतुरस्रः ऊ
र्द्धीकृतगोपुच्छसंस्थानसंस्थितः तस्य प्राकारस्योपरि पंचधनुःशतविस्तृतानि क्रोशार्द्धप्रमाणायामानि देशोनार्द्धक्रोशोच्चा
नि सर्वमणिमयानि कपिशीर्षाणि तानि च पंचच स्मानि तस्याश्च राजधान्या एकैकस्यां बाहायां पंचविंशं पंचविंशं
द्वाराणां शतं तानि च द्वाराणि सार्द्धद्वाषष्टियोज नानि ऊर्द्धमुच्चैस्त्वेन एकत्रिंशद्योजनानि सक्रोशानि विष्कंभतः

:तावंत एव प्रवेशेन तेषां द्वाराणामुपवर्णनं वि जयद्वारवर्णकवन्निरवशेषं एकैकस्य द्वारस्योभयपार्श्वयोः पा
र्श्वयोः प्रत्येकमेकोमहारपीठः तच सर्ववैपीठा :सर्वरत्नमयाः बाहल्यतोऽर्द्धतृतीयक्रोशाधिकानि पंचदशयोज
नानि सक्रोशान्येकत्रिंशद्योजनानि आयामविष्कंभाभ्यां तेषां च पीठानामुपरि प्रत्येकमेकैकः प्रासादावतंसकः तेऽ
र्द्धतृतीयक्रोशाधिकानि पंचदशयोजनान्यायामविष्कंभाभ्यां एकत्रिंशद्योजनानि सक्रोशानि उच्चैस्त्वेन तथा तत्रैके
कस्य द्वारस्य नातिदूरप्रत्यासन्ने भूभागे सप्तदश सप्तदश भौमाः प्रासादावर्त्तंते तत्र नवमनवमानां भौमानां मध्यभागे प्र
त्येकं तेषां बहुतः तत्रापि मध्यवर्त्तिनो नवमभौमानामंतः प्रत्येकं विजयदेवस्य सिंहासनं तस्य परिसमंतात्साम ४२
णं च सामानिकानां देवानां योग्यानि भद्रासनानि शेषभौमेषु बहिर्वर्त्तिषु अष्टसु भौमेषु प्रासादेषु प्रत्य॥

कमेकैकं सिंहासनं तस्याश्च राजधान्या बहिश्चतसृषु दिक्षु पंचशतयोजनान्यतिवाह्यातिवाह्य एकैको वनखंडः ता
च पूर्वस्यां दिशि अशोकवनं दक्षिणस्यां सप्तपर्णवनं पश्चिमायां चंपकवनं उत्तरस्यां चूतवनं एतानि च वनखंडाः प्रत्येकं सा
तिरेकाणि द्वादशयोजनसहस्राण्यायामेन पंचयोजनशतानि विष्कंभेन प्रत्येकं प्राकारपरिक्षिप्ताः तेषां च वनखंडानां ब
हुमध्यदेशभागे प्रत्येकमेकैकः प्रासादावतंसकः ते च प्रासादावतंसकाः प्रत्येकं सार्द्धद्वाषष्टियोजनान्यूर्द्धमुच्चै
स्त्वेन सक्रोशान्येकत्रिंशद्योजनानि विष्कंभतः एतेषां च प्रत्येकमेकैकं सिंहासनं तेषु चैवं चतुर्षु प्रासादेषु प्रत्येक
मेकैको महर्द्धिकः पल्योपमस्थितिको देवः प रिवसति तत्र पूर्वस्मिन् प्रासादेऽशोकनामा देवः एवं दक्षिणस्यां
सप्तपर्णनामा पश्चिमायां चंपकनामा उत्त रस्यां चूतनामा एते च प्रत्येकं स्वस्य स्वस्य वनखंडस्य स्वकीयानां

च सामानिकदेवानां स्वकीयानां स्वकीयानाम ग्रमहिषीणां स्वकीयानां पर्षदां स्वकीयानां चानीकानामनीका
धिपतीनां स्वकीयानामात्मरक्षदेवानामाधिपत्यं भुंजानास्तिष्ठंति तस्याश्च राजधान्याश्चांतर्बहुसमरमणीयो भूमिभा
गे स्फुरज्जाम्बूनदमयपीठिकाबंधः स च द्वादशयोजनान्यायामविष्कंभाभ्यां त्रीणि योजनसहस्राणि सप्तशतानि सपंचनवति
नि किंचिद्विशेषाधिकानि परिक्षेपतः गव्यूतार्द्धं च बाहल्यतः स चैकया पद्मवरवेदिकया तत्पूर्ववर्णितैकेन वनखंडेन
सर्वतः समंतात् संपरिक्षिप्तः तस्य च पीठिकाबंधस्य चतसृषु दिक्षु प्रत्येकमेकैकं त्रिसोपानमवतरणोत्तरणद्वारं ए
कैकस्य द्वारस्य एकैकं पुरतस्तोरणं तोरणवर्णकः प्राग्वत् छत्रतोरणवर्णकवत्परिभावनीयः तस्य च पीठिकाबं
धस्य मध्ये बहुसमरमणीयभूमिभागे महानेकस्तपनीयमयः प्रासादावतंसकः स च सार्द्धद्वाषष्टियोजनान्यूर्द्धमुच्चैस्त्वेन

सक्रोशानि एकत्रिंशद्योजनान्यायामविष्कम्भाभ्यां तस्य च प्रासादावतंसकस्यान्तर्बहुमध्यदेशभागे महत्येका सर्वरत्नमयी
मणिपीठिका सा च योजनप्रमाणायामविष्कम्भेन गव्यूतद्वयबाहल्या तस्याश्च मणिपीठिकाया उपरि महदेकं विजयदेवयो-
ग्यं सिंहासनं तद्वेउसामानिकायानां सिंहासनैः परिवृतं स चैष मूलप्रासादावतंसकोऽन्यैश्चतुर्भिः प्रासादावतंसकैर्मू-
लप्रासादापेक्षयाऽर्द्धायामविष्कम्भोच्चत्वैः सर्वतः समन्तात् परिक्षिप्तः तेषु प्रासादावतंसकेषु मध्ये प्रत्येकमेकैकं सिंहासनं ते-
ऽपि च ते प्रासादावतंसकास्तदन्यैश्चतुर्भिः प्रासादैः तदपेक्षयार्द्धायामविष्कम्भोच्चत्वैः परिक्षिप्ताः तेषामपि मध्ये प्रत्येकमेकं
सिंहासनं तस्य च मूलप्रासादावतंसकस्योत्तरपूर्वस्यां दिशि विजयदेवयोग्या सर्वरत्नमयी दिव्यागनासंयपरिक्षा-
र्षा निरंतरप्रवर्त्तमानदिव्यनाटकप्रमोदा। सा सुधर्मा नाम सभा सा च सार्द्धानि द्वादश योजनान्यायामेन

सक्रोशानि षड्योजनानि विष्कम्भतः नव च योजनान्युच्चैस्त्वेन तस्याश्च सुधर्मायाः सभायास्त्रीणि द्वाराणि तद्यथा ए-
कं द्वारं पूर्वस्यां दिशि एकमुत्तरस्यामेकं च द- क्षिणस्यामिति तानि च द्वाराणि प्रत्येकं द्वे योजने उच्चैस्त्वेन ए-
कैकं योजनं विष्कम्भतः तेषां च पुरतः प्रत्येकमेको मुखमण्डपकः ते च मुखमण्डपकाः उन्नमतपनीयमयवेदोदयाः
प्रत्येकं सार्द्धानि द्वादशयोजनानि दैर्घ्येण सक्रोशानि षड्योजनानि विष्कम्भतः सातिरेके द्वे योजने उच्चैस्त्वेन ते-
षां च मुखमण्डपानां पुरतः प्रत्येकमेकैकः प्रेक्षागृहमण्डपकः ते च उन्नमतपनीयमयवेदोदयाः प्रमाणतोऽपि मुख-
मण्डपकतुल्या वेदितव्याः तेषां च प्रेक्षागृहमण्डपकानां बहुमध्यदेशभागे प्रत्येकमेकैका मणिपीठिका ताश्च मणि-
पीठिकाऽर्द्धयोजनबाहल्याः योजनायामविष्कम्भाः तासां च मणिपीठिकानामुपरि प्रत्येकं सिंहासनं तेषां च प्रे-

क्षागृहमण्डपकानां पुरतः प्रत्येकमेकैका द्वियोजनायामविष्कम्भबाहल्या सर्वमणिसमुदायात्मिका मणिपीठिकाः तासां च म-
णिपीठिकानामुपरि प्रत्येकमेकैकः सर्वरत्नमयो देशोनद्वियोजनायामविष्कम्भः परिसर्वे द्वे योजने उच्चैस्त्वेन स्तूपः ते-
षां च चैत्यस्तूपानामुपरि प्रत्येकं सर्वरत्नमयान्यष्टावष्टौ मङ्गलकानि तेषामपि चैत्यस्तूपानां प्रत्येकं चतसृषु दिक्षु प्रत्येक-
मेकैका योजनायामविष्कम्भा अर्द्धयोजनबाहल्या मणिपीठिका तासां मणिपीठिकानां च तस्या उपरि स्तूपाभिमुखाश्च-
तस्रश्चतस्रो जिनप्रतिमाः तद्यथा ऋषभो १ वर्द्धमानश्च २ चन्द्राननो ३ वारिषेणश्च ४ तेषां च चैत्यस्तूपानां पुरतः प्रत्येकमेके-
का मणिपीठिका द्वियोजनायामविष्कम्भा योजनप्र- माणबाहल्या तासां च मणिपीठिकानामुपरि प्रत्येकमेकैकोऽष्टयो-
जनोच्छ्रयश्चैत्यवृक्षः ते च सर्वेऽपि प्रत्येकं सा- र्वरत्नमयाः तद्यथा वज्रमयमूलाः रिष्टरत्नमयविपुलकन्दाः वै-

डूर्यरत्नमयस्कन्धाः सुजातजातरूपविशाल- शाखाः नानामणिरत्नमयमनोहारिप्रशाखाः तपनीयपत्रवृन्ताः
वैडूर्यरत्नात्मकपत्रसंघाताः जाम्बूनदमयसुकुमा- रकोमलपल्लवाङ्कुरधराः विचित्रमणिरत्नमयसुरभिकुसुमफ-
लभरनमितशाखाग्राः ते च चैत्यवृक्षाः प्रत्येकं तिलकचन्दनार्जुनप्रमृतिभिर्नानाप्रकारैस्तरुभिः परिवृताः तेषामुप-
रि चैत्यवृक्षाणां पुरतः प्रत्येकमेकैका योजनप्रमाणायामविष्कम्भा अर्द्धयोजनबाहल्या मणिपीठिका तासामुपरि प्रत्ये-
कमेकैको महेन्द्रध्वजः ते च महेन्द्रध्वजाः प्रत्येकमष्टयोजनोच्छ्रयाः अर्द्धक्रोशविष्कम्भाः वज्रमयाः वातोद्धूयमानवैजयन्ती-
पताकाः छत्रातिच्छत्रकलिताः तेषामपि च महेन्द्रध्वजानां पुरतः प्रत्येकमेकैका नन्दापुष्करिणी ताश्च प्रत्येकं सार्द्धद्वादश-
योजनायामाः क्रोशाधिकषड्योजनविष्कम्भाः दशयोजनप्रमाणोद्वेधाः प्रत्येकमेव च पद्मवरवेदि-

कया वनषंडेन च परिक्षिप्ता: तस्यां च सुधर्मायां सभायां पीठिका: षट्सहस्रसंख्याका: तद्यथा सहस्रद्वयं पूर्वस्यां दिशि प-
श्चिमायां एकं सहस्रं दक्षिणस्यां एकं चोत्तरस्यां तासु सर्वास्वपि सुवर्णरौप्यमयफलकानि वद्धा: तेषु च फलकेषु वज्रम-
या नागदंता: तेषु च लंबमानानि सुरभिगंधानि माल्यदामानि तथा सुधर्मायां धूपवासपीठिका अपि षट्स-
हस्रसंख्या: तत्रापि द्वे सहस्रे पूर्वस्यां दिशि पश्चिमायामेकं सहस्रं दक्षिणस्यामेकमुत्तरस्यां तास्वपि धूपवासपीठि-
का: समस्तास्वपि रौप्यमयफलकरचिता: तेषु च फलकेषु वज्रमया नागदंता: तेष्वपि नागदंतकेषु वज्रमयानि सिक्य-
कानि तेषु च सिक्यकेषु वज्रमयो निरंतरं धूपघटिका: तथा तस्या: सुधर्माया: सभाया बहुमध्यदे-
शभागे महती एका द्वियोजनायामविष्कंभा योजनबाहल्या सर्वमणिमयी पीठिका तस्याश्च मणिपी-

ठिकाया उपरि महानेको वज्रमयो माणवकाख्य: चैत्यस्तंभ: स च सार्धसप्तयोजनान्यूर्ध्वत्वेन क्रोशार्धं
बाहल्यत: क्रोशार्धं विष्कंभेन तस्य च माणवकस्तंभस्योर्ध्वमधश्च प्रत्येकं षट्षट्क्रोशान् विहाय शेषेष्वर्धपंचमेषु यो-
जनेषु बहूनि सुवर्णरौप्यमयानि फलकानि तेषु च फलकेषु प्रत्येकं वज्रमया नागदंता: तेषु च नागदंतकेषु वज्रमया-
नि सिक्यकानि तेषु च गोलकाकारा वज्रमया: समुद्गका: तेषु च समुद्गकेषु जिनसक्थीनि संनिक्षिप्तानि तिष्ठंति यानि वि-
जयदेवस्य अन्येषां च बहूनां वानमंतराणां देवानां देवीनां च कल्याणमंगलमित्यादिरूपाणि पर्युपासनीयानि तस्य च माणवकचै-
त्यस्तंभस्योपरि पूर्वस्यां दिशि महत्येका योजनप्रमाणायामविष्कंभा अर्धयोजनबाहल्या मणिपीठिका तस्याश्चोपरि महदेकं
सिंहासनं तस्यैव च माणवकचैत्यस्तंभस्य पश्चिमायां दिशि योजनप्रमाणायामविष्कंभा क्रोशद्वयबाहल्या महत्येका मणिपी-

ठिका तस्या उपरि महदेकं सुवर्णमणिमयं देवशयनीयं तस्य च देवशयनीयस्य उत्तरस्यां दिशि महानेक इंद्रध्वज: तस्य
इंद्रध्वजस्य पश्चिमायां दिशि महानेक: प्रहरणकोश: तत्र च परिघरत्नप्रमुखाणि नानारूपाणि प्रहरणानि तस्याश्च सु-
धर्मायां सभायां उत्तरपूर्वस्यां दिशि महदेकं सिद्धायतनं सुधर्मासभातुल्यायामविष्कंभपरिमाणं तस्य च सिद्धायतनस्य
बहुमध्यदेशभागे द्वियोजनायामविष्कंभा योजनबाहल्या महत्येका मणिपीठिका तस्याश्चोपरि सर्वरत्नमयो द्वियोजनप्र-
माणायामविष्कंभोच्चो महानेको देवच्छंदक: तस्मिंश्च देवच्छंदके जिनप्रतिमानामष्टोत्तरशतं तस्य च सिद्धायतनस्योत्तरपूर्व-
स्यां दिशि महत्येका उपपातसभा सा च सुधर्मासभेव वक्तव्या तस्यां चोपपातसभायां अंतर्बहुसमरमणीये भूमिभागे द्वि-
योजनायामविष्कंभा अर्धयोजनबाहल्या म- हत्येका मणिपीठिका तस्याश्च मणिपीठिकाया उपरि महदेकं

देवशयनीयं यत्र विजयदेवस्योपपात: ति तस्या उपपातसभाया उत्तरपूर्वस्यां दिशि महानेको ह्र-
दो वर्तते स च प्रायो नंदापुष्करिणीतुल्यायामवि- ष्कंभोद्वेधपरिमाण: पद्मवरवेदिकया वनषंडेन च समंतत: परि-
क्षिप्त: तस्माच्च ह्रदस्य उत्तरपूर्वस्यां दिशि महत्येका अभिषेकसभा तस्याश्चाभिषेकसभाया बहुमध्यदेशभागे अर्धयोज-
नबाहल्या योजनप्रमाणायामविष्कंभा सर्वमणिमयी महत्येका मणिपीठिका तस्याश्चोपरि महदेकं सिंहासनं यत्रोपवि-
ष्टो विजयदेवोऽभिषिच्यते तस्याश्चालंकारसभाया उत्तरपूर्वस्यां दिशि महत्येका व्यवसायसभा तस्याश्चापि मध्ये योजनप्र-
माणायामविष्कंभा अर्धयोजनबाहल्या मणिपीठिका तस्या उपरि महदेकं सिंहासनं तत्रैको विजयदेवस्य समस्तव्यव-
सायप्रतिपादको महान् सुवर्णमणिरूप्यमणिमय: पुस्तकस्तस्याश्चापि व्यवसायसभाया: उत्तरपूर्वस्यां दिशि महदेकं द्वियोज-

Dr. B... MEMORIAL

न प्रमाणायामविष्कंभं योजनप्रमाणबाहल्यं सर्वरत्नमयं वलिपीठं समस्ति तस्य वलिपीठस्योत्तरस्यां दिशि प्रागुक्तद्र
माणानंदाउक्करिणीति विजयद्वाराधिपालविजयदेवस्य विजयाभिधाना राजधानी वर्णिता च अथ वैजयंतादिद्वारवक्त
व्यताप्रतिपादनार्थमतिदेशमाह एवं चत्तारि वि दारा इत्यादि एवमनंतरोक्तविजयद्वारवच्चत्वार्यपि द्वाराणि सराजधानीकानि स लि
तव्यानि नवरं वैजयंतद्वारं मेरुसमवाक्षिप्तत्वदक्षिणस्यां दिशि पंचचत्वारिंशद्योजनसहस्राण्यतिक्रम्य लवणसमुद्रदक्षि
णभागमवगाह्य तत्र स्यां दिशि इत्यर्थः तस्याधिपतिरपि वैजयंतनामा विजयदेवसमानर्द्धिको वक्तव्यः तस्य राजधान्यपि
वैजयंतद्वाराद्दक्षिणस्यां दिशि तिर्यगसंख्येयान् द्वीपसमुद्रानतिक्रम्य तस्मिन्नेवापरस्मिन् जंबूद्वीपे द्वादशयो
जनसहस्राण्यवगाह्य अत्रांतरे वैजयंता॥ भिधाना वक्तव्या तथा जयंतद्वारं मेरोः पश्चिमायां दिशि पंच

एवं चत्तारि वि दारा सरा यहाणीओ भाणिअव्वा

चत्वारिंशद्योजनसहस्राण्यतिक्रम्य लवण समुद्रपश्चिमभागमवगाह्य सर्वस्यां दिशि शीतोदाया महान
द्या उपरि इत्यर्थः तस्याधिपतिरपि जयंतनामा नो जयंतस्य राजधानी जयंतद्वारात्पश्चिमायां दिशि प्रागुक्तप्र
कारेण प्रतिपाद्या अपराजितद्वारं च मेरोरुत्तरस्यां दिशि पंचचत्वारिंशद्योजनसहस्राण्यतिक्रम्य लवणसमुद्रोत्तरभा
गमवगाह्य दक्षिणस्यां दिश्यवगंतव्यं तस्य स्वामी च विजयसदृशोऽपराजितनामा राजधान्यप्यपराजितद्वारादुत्तरस्यां दिशि स
र्वविधिना ज्ञेया ननु वैजयंतादिद्वाराणामतिदेशः कर्तव्यः एवं चत्वार्यपीति यदुक्तं तत्र उक्तं यतो विजयद्वारस्थानतो
नातिदेश्यानि चाप्येव द्वाराणि संतीति चेत्सत्यं सर्वेषां वर्णकसाम्येन चतुर्णामपि परस्परमतिदेश्यत्वातिदेशकत्वाप
रंपरैव तत्र प्रयोगस्य उक्तिः उक्तत्वात् अन्यथा यथा चंद्रवत्सुखं तत्सुखवदिंदुः इत्यादिप्रयोगा विषमा तथाऽनापि विष ४६

मा पत्ता विजयवद्वैजयंतं वैजयंतवद्विजयमिति वक्तुमशक्यत्वापातः अथवा अव्यवहिताव्यवच्छेदकपदस्य केवलसं
ख्यावाचिनः शब्दस्यातिदेशकत्वमेव न्याय्यः प्रयोगस्य दृष्टत्वात् अतएव यथाऽयं तथा चत्वारोपीति शब्दे चतुष्टयविषया
कलोक्तिरपि च संप्रति विजयादिद्वाराणां परस्परमंतरं प्रश्नयति जंबुद्दीवस्सणं भंतेत्यादि जंबूद्वीपस्य भदंत द्वीप
स्य संबंधिनो द्वारस्य च द्वारस्य च कियत्किं प्रमाणमबाधया अंतरं चाप्रतिघातेन अंतरं प्रज्ञप्तं भगवानाह गौतम एकोना
शीतिर्योजनसहस्राणि द्विपंचाशत् योजनानि देशोनं चार्द्धयोजनं द्वारस्य च द्वारस्य चाबाधयाऽंतरं प्रज्ञप्तं तथाहि चतुर्णा
मपि द्वाराणां प्रत्येकमेकैकस्य जगत्यां द्वारशा रवाऽपरपर्यायस्य द्वारस्य गतं द्वाराणां च विस्तारः अन्ये च चा

जंबुद्दीवस्सणं भंते दीवस्स दारस्सयदा रस्सय केवइए अबाहाए अंतरे पन्नत्ते गो अउणासीतिं
जोयणसहस्साइं बावन्नं च जोयणाइं देसूणं अद्धजोयणं दारस्सय२ अबाहाए अंतरे पण

त्ते चत्तारि योजनानि तत्र चतुर्धीत दारसेषा सर्वसंख्यया जगतद्वारप्रमाणं अष्टादशयोजनानि जंबूद्वीपस्य
परिक्षिप्तोलक्षाः षोडशसहस्राणि शतानि स प्तविंशत्यधिके ३१६२२७ क्रोश३ अष्टाविंशं धनुःशतं १२८ त्रयोद
शांगुलानि एकं चार्धांगुलं इत्यस्माज्जंबूद्वीपपरिधेः सकाशात् तानि जगतीद्वारपरिमाणवर्त्तीनि अष्टादशयोजनानि शोध्यं
ते शोधितेषु चामीषु परिधिसत्कयोजनराशिरेवं जातः त्रिलक्षाः षोडशसहस्राणि शतानि नवनवत्यधिके ३१६२०९ अ
त्रोऽयं क्रोशधनुरादिकं तु प्राक्तनमेव तासां योजनराशेश्चतुर्भिर्भागो ह्रियते लब्धानि योजनानामेकोनाशीतिसहस्राणि द्विपंचा
शदधिकानि गतानि चैकं शत ७९०५२ क्रोश१ यानि च परिधेः सत्कानि त्रीणि गव्यूतानि तानि चत्वारिके विह्रियंते जातानि धनुषां षट्सहस्र
णि पंच परिधिसत्कमष्टाविंशं धनुःशतं तदपि तेषु धनुष्षु मध्ये प्रक्षिप्यते ततो जातो धनुराशिरेकषष्टिशतानि अष्टाविंशत्यधिकं

जं.सा.श.

ति तेषां चतुर्भिर्भागे हृते लब्धानि षट्पञ्चाशच्छतानि द्वात्रिंशदधिकानि १५३२ यानि च त्रयोदशाङ्गुलानि तेषामपि चतुर्भिर्भागे
हृते लब्धा नवाङ्गुलानि यच्चैकमङ्गुलमवशिष्यते तस्याप्यष्टौ यवाः अर्धाङ्गुलं सर्वं मिलितं चतुर्भिर्विभक्तं लब्धा द्वादश यवाः स्व-
र्वैर्लब्धाः लक्षा यवा एतच्च सर्वाङ्केन गव्यूतेन सह दृश्यमानं सर्वयोजनं भवति उक्तं च जगतीद्वारप्रमाणं द्वारस्य जो-
अणाइं परिहीए सोहिअ चउहिं विभत्ते इणमो दारंतरं होइ १ अउणासीइसहस्सा बावन्नाअद्धजोअणं ऊणं दारस्स यदा-
रस्स य अंतरमेअं विणिद्दिट्ठं २ अथोक्तमेवार्थं गाथाबन्धेन सङ्ग्रहकार आह अउणासीइ गाथा व्याख्यातार्था ॥

अउणासीइसहस्सा बावन्नं चेव जोअणा हुंति। ऊणं च अद्धजोअण दारंतरं जंबुदीवस्स ॥ कहि णं भं-
ते जंबुद्दीवे दीवे भरहे णामं वासे पण्णत्ते गोयमा चुल्लहिमवंतस्स वासहरपव्वयस्स दाहि-
णेणं दाहिणलवणसमुद्दस्स उत्तरेणं पुरत्थिमलवणसमुद्दस्स पच्चत्थिमेणं पच्चत्थिम-
लवणसमुद्दस्स पुरत्थिमेणं एत्थ णं जंबुद्दीवे दीवे भरहे णामं वासे पण्णत्ते खाणुबहुले ॥

जंबूद्वीपप्रथमप्रज्ञापकयोगाच्च यथाक्रमं भरतक्षेत्रमेव प्रश्नविषयीकरोति कहि णमित्यादि क्व भदन्त प्रदेशे-
ऽन्तरे जम्बूद्वीपे द्वीपे भरतं नाम वर्षं क्षेत्रं प्रज्ञप्तं उक्तं तीर्थकृद्भिः सर्वत्र प्राकृतत्वात् भगवानाह गौतम क्षुल्लहिम-
वतो वर्षधरपर्वतस्य दक्षिणेन दक्षिणलवणसमुद्रस्योत्तरेण पौरस्त्यलवणसमुद्रस्य पश्चिमेन पश्चिमलवणसमुद्रस्य
पूर्वेण अत्रान्तरे इत्यलङ्कारे भरतं नाम वर्षं क्षेत्रं प्रज्ञप्तं मयाऽन्यैश्च तीर्थकृद्भिरिति गम्यते तच्च भरतक्षेत्रं कीदृग् प्रज्ञप्तमिति
स्वयमेव गौतमाभिप्रायं ज्ञात्वा भगवान् स्वयमेवाह स्थाणुबहुलेति स्थाणवः कीलकाः तद्विशिष्टवनस्पतिकानां च शि-
खण्डलादयोऽवयवविशेषाः पश्यादिबन्धननिमित्तं भूमिनिखातप्रदेशाः काष्ठखण्डानि तैर्बहुलं व्याप्तं तेषां बहुलानि क्वचिदप्यत्र

एवं कण्टकबहुलमित्यादि विशेषणेषु बहुलं बोध्यं परिभावनीयं तत्र कण्टकाः बब्बूलादिवनस्पतीनां तीक्ष्णाग्राः विषमाणि स्थान
विषमोन्नतप्रदेशाः दुर्गाणि अप्रवेशादिना मनसा बाणेन वा गन्तुमशक्यानि विषमस्थानानि पर्वताः गिरयः प्रपाताः गिरेर्जलपतनस्थाना-
नि उज्झराः अवझराः पर्वततटादुदकस्याधःपतनं निर्झराः उदकस्य श्रवणं निरन्तरं दानैः खड्डाः अल्पक्षेत्रव्यापिजलप्रवा-
हौ वा विषमस्थानप्रदेशाः दर्यः कन्दराः गिरिविवराणि नद्यः नद्यः हृदाः द्रहाः वृक्षाः सहकारादयः गुच्छाः वृन्ताकी प्र-
भृतयः गुल्मानि नवमालिकाप्रभृतीनि लताः चम्पकलतादयः वल्ल्यः कूष्माण्डीत्रपुषीप्रभृतयः अटव्यः श्वापदादिभयस्था-

कंटकबहुले विसमबहुले दुग्गबहुले प- व्वयबहुले पवायबहुले उज्झरबहुले णिज्झरबहुले खड्डाब-
हुले दरिबहुले णईबहुले दहबहुले रुक्खबहुले गुच्छबहुले गुम्मबहुले लयाबहुले वल्लीब-
हुले अडवीबहुले सावयबहुले ते- णबहुले तक्करबहुले डिंबबहुले डमरबहुले
दुब्भिक्खबहुले दुक्कालबहुले पासंड- बहुले किवणबहुले वणीमगबहुले ईतिबहुले मा-
रिबहुले ॥

निकानि वनानि श्वापदाः सिंहादयः स्तेनाश्चौर्यका- रिणः तस्करास्त एव विशेषाः एव तत्रभक्ता वा
रिपो जीविकां कुर्वाणा अपि कदाचित्स्तेनयन्ति कुर्वन्ति ये तत्स्तेना इत्युक्ताः तस्करास्तु चौर्यमात्रजीविका एव तायिणो महा-
डम्बरायासतिभेदः डिम्बा विघ्ना निवादितुर्जनसलापद्रवाः डमरा राजकुमारादिसम्बन्धि विरोधसमुद्भवा उपद्रवाः दुर्भिक्षं भि-
क्षाचराणां भिक्षादौर्लभ्यं दुष्कालोऽकालः सर्वत्र धान्याभावेन भिक्षादौर्लभ्यविशिष्टो दिवसमाससाहित्यलक्षण
पाषण्डाः शाक्यादयः कृपणाः श्रद्धालुदयावा- नीयकाः यावनाजीविनो भक्तादयः ईतयः शलभशुकमूषकादयः प्रा-
णिघ्नश्च शलभमूषकपक्षिलक्षणाः माः मारिर्मारकाणां देवादिकृतो महाजनक्षयोपद्रवाः ॥

४७

ऊर्ध्वाधोलोकमध्ये तिर्यग्लोकस्तत्र। अत्र हि मर्यादया इह नरकावासा राज्यानाद्धयास्थवनयाशायस्य विरोधिचेतनालोको
नवकादिगणोत्सर्वतिरोगाद्धशतासाबाद्याः संक्लेशाः। ऊर्ध्वजनऊर्ध्वपादिस्थताः स्थितास्तेषु गादेतु प्राहुरयः अत्रीदत्तमनीकं
लयसंतोषाः पश्चक्रादिलयसत्त्वाः अस्मास्तु कृपा एतेऽङ्कुलं व्यासमानं वा ऊर्ध्वाधस्तु वायत्र तत्र याविधलवनदेवे
एतत्त्ववर्णने योगलिङ्गधर्मेति हन्ते राज्यक्षितो धर्मस्थितोव प्रहन्तायां सन्यासिन इत्युक्तं नेऊनाः सर्वकालीनं नदप्रहतो
नन्निहन्तौ च उषमाषुषमादिकाले तथाम्यलावालावात् किंत्वसुषमासुषमादिकाले योगलिङ्गमत्याणां तथाविधत्वोणात्वना
वात् एव ऊर्ध्वादिक्षेत्रवत् भरतक्षेत्रस्यापि परिणा मिश्वगंतव्या लोऊर्ध्वकर्मभूमत्वाच्च योग्यवस्तूनां परिणामः अ

ऊवट्ठिविदुले अणाउट्ठिविदुले गयव दुले रोगवद्दुले संकिलेसवद्दुले अनिष्कण्णेरसंखो।
द्दवद्दुले पाईणपडीणायात उदीणदा। हिण विच्छिन्ने उत्तरनापलियंकसंठिए दाहिणउधनु
पिट्ठसंठिए तिहालवणसमुद्दं उवट्ठि गंगा सिंधूहिं महानईहिं वेयड्ढेणयपब्वएण बहुसमपविभ

त्त व ८

तप्परवताविरवतादीनि क्षेत्राणि हिमवदादयस्त्र । पर्वताः सर्वमपि शुभाशुभकर्मनिर्बंधनमिति आमद्
निश्चयनेत्रतीतं अनुधाहाक्षिणस्तम्भरदस्मरणं वासस्य क्षेत्रिय आगावलावयामश्चरि पमाद गो बज्जसमरमणिख्खेर
त्यादिनाविशेषः स्यात् ततन्यासं नवं कालविशेषावच्छेदेन परिभावनीयं व अवरक्षेत्रस्यायाममायादं पाईणोत्या
दि प्राचीनप्रतीचीनयोः सर्वपश्चिमयोरायतं दीर्घं उदीचीनदक्षिणयोरुत्तरयाम्ययोर्विस्तीर्णं उत्तरतः पर्यंकसंस्थितं
पर्यंकासनसंस्थानं दक्षिणतो धनुःपृष्ठसंस्थितं त्रिधा सर्वतःपश्चिमतोऽपि पूर्वतो दक्षिणतो धनुःपृष्ठेनाचतित्रि
ति स्पृष्टं गंगासिंधुभ्यां महानदीभ्यां वैताढ्येन च पर्वतेन षट्खण्डप्रविभक्तं षड्विंशतिर्विभागास्तत्र मितर्षि वा॥

अथ लक्षयोजनप्रमाणस्य जंबूद्वीपस्य कति भागा भरतमित्याह जंबुद्दीवेत्यादि जंबूद्वीपद्वीपनवतिशतभागं जं
बूद्वीपस्य नवत्यधिकशततमो भागो भरतमित्यर्थः तथैव हिमवान् १ महाहिमवान् २ निषधो ३ नीलो ४ रुक्मी ५ शिखरी ६
इति नामानः षड्वर्षधराः सप्तनीताति भरतं १ हैमवतं २ हरिवर्षं ३ महाविदेहो ४ रम्यकं ५ हैरण्यवतं ६ ऐरवतं ७
इति नामानि सप्तवर्षाणि तत्र भरतक्षेत्राद्द्विगुणविस्तरो वर्षधरः यावद्विदेहक्षेत्राद्द्विगुणो नीलो वर्षधरो यावत् वर्षवर्षधरा
द्विगुणद्विगुणायामाः महाविदेहस्तु निषधवर्षधराद्द्विगुणायामः तथा च एकोभागो भरतक्षेत्रे द्वौ भागौ हिमवान् वर्षधरः च
त्वारो भागा हैमवतक्षेत्रे अष्टौ भागा महाहिमव द्वर्षधरः षोडश भागा हरिवर्षक्षेत्रे द्वात्रिंशद्भागा निषधे वर्षध

जंबुद्दीवदीवउत्तरअयणभागे पंचवड्डी सजोयणसए छच्च एगूणवीसतिभागे जोयणस्स विक्खं
भेणं भरहस्स णं वासस्स बहुमज्झदेस भाए एत्थ णं वेयड्ढे णामं पव्वए पण्णत्ते जेणं भरहं वा
सं दुहा विभयमाणे चिट्ठति॥

रः चतुःषष्टिर्भागा महाविदेहक्षेत्रे द्वात्रिंशद् भागा
नीलो वर्षधरः षोडश भागा रम्यकक्षेत्रे अष्टौ भा गा रुक्मी वर्षधरः चत्वारो भागा हैरण्यवतक्षेत्रे द्वौ भागौ शिख
री एको भागो ऐरवतक्षेत्रे चेति सर्वसंख्यामीलने नवत्यधिकशतं स्यात् ततश्च त्रय भागो भरतक्षेत्रमिति अयमेकेन भागेन
कियन्ति योजनानीत्याह पंचवडीसे इत्यादि षड्विंशत्यधिकानि पंचयोजनशतानि षड्विंशतिर्भागा योजनस्य एक
स्य योजनस्यैकोनविंशतिभागाः कियंति तावंति भागाः इत्यर्थः तद्भरतक्षेत्रपर्यन्तत्वाद् एतावत्प्रमाणं भरतक्षे
त्रमिति च अथ वैताढ्यः पर्वतः क्वस्थितः किं च ऊर्ध्वत्वमित्याह भरहस्सणमित्यादि भरतस्य क्षेत्रस्य बहुमध्यदेशभागे वैताढ्यो
नाम पर्वतः प्रज्ञप्तः जेणंति येनेति प्राग्वत् भरतक्षेत्रं द्विधा सर्वे प्रकारान्वितं जगतीविभागाः ऊर्ध्वमिति स्यात्

तस्याकारस्वरूपमाह तेजद्देत्यादि तत्र यो दक्षिणार्द्धभरतं उत्तरार्द्धभरतं च एतस्योपाधिकं नामद्वयं प्रवचने प्रतीतं ॥ अथ दक्षि
णार्द्धभरतार्द्धं क्वास्ति जिज्ञासायामिमां सूत्रं दक्षिणार्द्धभरतस्यादि क्व भदंत जंबूद्वीपे द्वीपे दक्षिणार्द्धभरतं प्रज्ञप्तं
भगवानाह गौतम वेताढ्यस्य पर्वतस्य दक्षिणेन दक्षिणलवणसमुद्रस्योत्तरेण पौरस्त्यलवणसमुद्रस्य पश्चिमेन पा
श्चिमलवणसमुद्रस्य पूर्वेण सर्वस्यां दिशि एवं गति अत्राणामित्यलंकारे जंबूद्वीपे द्वीपे नाम्ना दक्षिणार्द्धभरतं
प्रज्ञप्तं तच्च प्राचीनप्रतीचीनयोः पूर्वपश्चिमयोरायतं दीर्घं उत्तरदक्षिणायां विस्तीर्णं संस्थानेन अर्द्धचंद्रसंस्थानसं

तं दाहिणद्धभरहं उत्तरद्धभरहं च क हिणं भंते जंबुद्दीवे दाहिणड्ढभरहे णामं वासे पण्णत्ते गो
वेअड्ढस्स पव्वयस्स दाहिणेणं दाहिणलव णसमुद्दस्स उत्तरेणं पुरत्थिमलवणसमुद्दस्स पच्चत्थिमे
णं पच्चत्थिमलवणसमुद्दस्स पुरत्थिमे णं एत्थ णं जंबुद्दीवे दाहिणड्ढभरहे णामं वासे पण्णत्ते
पाईणपडीणायए उदीणदाहिणविच्छिन्ने अद्धचंदसंठाणसंठिए तिहा लवणसमुद्दं पुट्ठे गंगासि
सिंधूहिं महानईहिं तिभागपविभत्ते दो ण्णि अट्ठतीसे जोयणसए तिण्णि अ एगूणवीसइभागे जो
यणस्स विक्खंभेणं ॥

स्थितं त्रिधा द्वाभ्यां कोटिभ्यां पृष्टेन चेति त्रिभिः प्रकारैर्लवणसमुद्रं स्पृष्टं गंगासिंधुभ्यां म
हानदीभ्यां त्रिभागप्रविभक्तमिति अस्य योजनैः प्रमाणमाह द्वे शते अष्टत्रिंशदधिके योजनानां शतत्रयांश्चै
कोनविंशतिभागा योजनस्य विष्कंभेन तथाहि भरतक्षेत्रस्य विष्कंभः पंचयोजनशतानि षड्विंशत्यधिकानि ष
ट्चैकोनविंशतिभागा योजनस्य तस्मात्वैताढ्य स्य पृथुता पंचाशद्योजनानि अपनीयंते शेषं चत्वारि
शतानि षट्सप्तत्यधिकानि षट् च कलाः ॥ तस्यार्द्धे द्वे शते अष्टत्रिंशदधिके ॥

कलात्रयं च कलाः एतावत्प्रमाणं दक्षिणार्द्धभरतं विष्कंभेन तद्व्यक्तस्थापना २३८ क ३ १९ ॥ अथास्य जीवाधनुःपृ
ष्टे तस्याः स जीवाप्रमाणमाह तस्स जीवेत्यादि तस्य दक्षिणार्द्धभरतस्य जीवा वैताढ्यपर्वतादर्वाचीनाकारा प्रदेशपंक्तिरू
पा प्रत्यंचाकल्पत्वात् सा चोत्तरस्यां दिशि विनिर्मितावाचीनप्रतीचीनायता पूर्वपश्चिमयोर्दीर्घा अत एव द्विधा लवणस
मुद्रं स्पृष्टा कथं स्पृष्टेत्याह पुरत्थिमिल्लाए त्ति अत्रैते प्रत्ययाः स्वार्थिकस्त्वेति प्राकृतसूत्रेण स्वार्थिकाः इल्लाउल्लायाइ
स्त्वाः तत्कयोरन्यया कोट्या पूर्वप्रदेशपंक्तिरूपया जीवा अंतप्रदेशात्मिकया अनुस्यूतेन पौरस्त्यं लवणसमुद्रं स्पृष्टेत्यादिवत्

तस्स जीवा उत्तरेणं पाईणपडीणायया दु हा लवणसमुद्दं पुट्ठा पुरत्थिमिल्लाए कोडीए पुरत्थिमिल्लं
लवणसमुद्दं पुट्ठा पच्चत्थिमिल्लाए कोडी ए पच्चत्थिमिल्लं लवणसमुद्दं पुट्ठा नवजोयणसहस्साइं
सत्त य अडयाले जोयणसए दुवालस य एगूणवीसइभागे जोयणस्स आयामेणं ॥ ती
से णं धणुपट्ठे दाहिणेणं नवजोयण सहस्साइं सत्त य छावट्ठे जोयणसए एक्कं च एगूणवी
सइभागं जोयणस्स किंचिविसेसाहियं प रिक्खेवेणं पण्णत्ते ॥ कण्ठ्यं नवरं याच त्रसालालोसेल पार्श्वः पूर्वा

श्चिमिल्ले पश्चिमदिग्वर्त्तिनं लवणसमुद्रं स्पृष्टा पच्चत्थिमिल्लाए त्ति पश्चिमया कोट्या पश्चिमदिग्वर्त्तिनं लवणसमुद्रं स्पृ
ष्टा तस्याश्चैकप्रदेशात्मकत्वेन स्पृष्टत्वमुपस्थाप्य दैर्घ्येण योजनप्रमाणमाह नवजोयणेत्यादि नवयोजनसहस्राणि सप्त
शतानि अष्टचत्वारिंशद्योजनानि द्वादश चैकोनविंशतिभागा योजनस्यायामेन तद्व्यक्तस्थापना योजन ९७४८ क १२ १९
॥ अथ दक्षिणार्द्धभरतजीवाया धनुःपृष्टमाह तीसे णं धणुपट्ठे इत्यादि तस्या जीवाया धनुःपृष्टं दक्षिणेन नवयोजनसहस्रा
णि सप्तशतानि षट्षष्टियोजनानि एकं चैकोनविंशतिभागं किंचिद्विशेषाधिकं परिक्षेपेण परिधिना प्रज्ञप्तं तद्व्यक्तस्थापना ॥

जं॰प्र॰

योपलगह्ह्क्षप॥१५ अथोक्तयोर्जीवाधनुःपृष्ठयोः करणविभावना यथा जंबूद्वीपविष्कंभो विवक्षितेन मनस्केनैवेषुणोन
णितोऽनंतरं चतुर्गुणितः एषजीवावर्गस्तस्य वर्गमूलानयने यदेषितांजीवा भवति यदुक्तं मंडलविक्खंभाओ उसुऊणाओ
उसुगुणोउ चउगुणिउ एसो कज्जा अवगो मूलेउ जडक्खिआ जीवत्ति तथाहि जंबूद्वीपस्य विष्कंभो योजनलक्षं सव कल
त्वकःकृतः जातएकोनविंशतिलक्षमाणः नवकोटिकोनवकः अन्यपंचकं वेतिः १५००००० एतदस्मात् दक्षिणभरत
नार्द्धयामकल्पइषु पंचविंशत्यधिकपंचशतयोजनप्रमाणकलारूपः ४५२५ शोधितं शोधितेन तस्मिन् जातः पश्चादस्या
शिः अष्टादशलक्षाः पंचनवतिसहस्राणि चत्वारि नाति पंचसप्तत्यधिकानि १८९५४७५ एषराशिर्दक्षिणभरतार्द्धेषु
णा पंचविंशत्यधिकपंचचत्वारिंशच्छतप्रमाणे नेध(?)पंचषु गुणिते जाताः अष्टकाःपंचकाः सप्तकाः सप्तकाः अन्येपि

कृष्णष्टकस्त्रिकाःसप्तकाःपंचकाःश्व८५७७०२४। ३७५ अयं चराशिश्चतुर्भिर्गुणितजाता त्रिकाःसप्तष्टकास्त्रिकाःश्च
नं चप्तकाःशून्यैककाःसप्तकाःपंचकाःशून्यद्वयं ३४ ३०८७०३०० तताःऽस्यविसमप्ययवर्गमवगोरत्यादिनापात्रा
रूपकारणं वर्गमूलानयने लब्धकला नामेकलक्षं पंचाशीतिसहस्राणि षट्शतानि चतुर्विंशत्यधिकोः १८५६२४ शेषस्त्र
ताः राशिः लक्षमेकं सप्तषष्टिसहस्राणि शतानि चतुर्विंशत्यधिकानि १६७६२४ छेदकोराशिर्द्वयलानिप्रालक्ष
१ सप्ततिसहस्राणि चत्वारिंशतानि अष्टचत्वारिंशदधिकानि ३७०४४८ वर्गलब्धस्य चराशेर्योजनानयनार्थं एकोनविं
शत्या भागेहृत्याव लब्धानि योजनानां नवसहस्राणि सप्तशतानि अष्टचत्वारिंशदधिकानि कलाश्चद्वादश९७४८ कला
१२ एवमत्रापि जीवाकरणंविभावनीयं ब अथधनुःपृष्ठकरणंयथा इषुवर्गंषड्गुणंजीवावर्गप्रक्षिप्य यत्तस्यवर्गमूलं तत्

नुःपृष्ठमिति यदुक्तं उसुवग्गेच्छगुणिए जिअवग्गेस्स कुणइ अपक्करणि धणुपठंति अयंभावः दक्षिणभरतार्द्धेषुःकलारूपः पंचचत्वारिंशत्
शतानि पंचविंशत्यधिकानि ४५२५ अस्यवर्गो द्विकाःशून्यंचत्वकाःसप्तकाःपंचकाःषट्कोद्विकाःपंचकश्च२०४७५६२५ एषराशिः षड्गुणि
तपने जाताः एककोद्विकोऽष्टकाःपंचकस्त्रिकाःसप्तकाःपंचकाःशून्यंचा १२२८५३७५०० एषाराशिर्दक्षिणभरतार्द्धसत्क जीवावर्गे
त्रिकस्त्रत्रष्कस्त्रिका अष्टमष्टकाःसप्तकाःशून्यद्वयं ३४३०८७०५०० प्रतिष्ठाप्यते ततो जातोराशिस्त्रिकस्त्रत्रष्कचतुं
त्रिकाःशून्यनवकाः पंचकएककोद्विकाःपंचकाःशून्यं च ३५४३०९५१२५०० अस्यवर्गमूले लब्धमेककोऽष्टकाःपंचकस्तष्ट्यंश
८५५५५७ शेषस्तु पश्चितनोराशिर्द्विकोनवकस्त्रिकोद्विकदयंपंचकश्च २५९२१९५ छेदकराशिस्त्रिकाःसप्तकएककद्वि
पंचशून्यं च ३७१११० वर्गलब्धस्यतुराशेर्योजनकरणार्थमेकोनविंशत्या भागोहियात लब्धानियोजनानां नव
दक्षिणहस्तदक्षिणमंतवास्य क्षेत्र सप्तआगारसावपयोआरपमनेण कउसमरमणि
ये नवमिलागपसात्र मिऊहणा मए अ रलिंगउरकरतिवाजावणाणविद्वाणं।
सहस्राणिसप्तशतानि षट्षष्ट्यधिकानि७६६क पंच एवमन्यत्रापिभावनाकार्या ब अथदक्षिणार्द्धभरतस्वरूप
प्रश्नविषयीकर्तुमाह दाहिणइत्यादि दक्षिणार्द्धभरतस्य भदंत कीदृशआकारभावप्रत्यवतारःप्रज्ञप्तः तत्र आकारभावःस्व
रूपविशेषस्तस्य प्रत्यवतारआविर्भावः यद्वा आकारस्य भावाश्च आकारभावास्तेषां प्रत्यवतारःकीदृशोर्द्धभरतक्षेत्रंकीदृ
शं वर्तमानमन्यत्स्वरूपः भगवानाह गोयम बहुसमरमणिज्जे इत्यादि बहुसमः अतएव रमणीयो भूमिभागो दक्षिणार्द्धभर
तक्षेत्रस्य प्रज्ञप्तः तत्र दृष्टांतमाह सेजहा नामए इत्यादि सेजहा नाम आलिंगपुक्खरेइ वा इत्यादि समस्तं तत्सकलंलोकप्रसिद्धं यथेति दृष्टांतोपन्यासार्थे नामेतिसंभावने
वाक्यालंकारे वा एवेति आमंत्रणे आलिंगोवाद्यविशेषस्तस्य पुष्करं चर्मपुटं तत्किलात्यंतसमं भवति तेन तदुपमाभूमिरुज

जं०प्र०३

रयणाणेत्यादि यावत् नानाविधाश्चानेकभेदभिन्नाः पंचवर्णा येषां तानि नानाविधपंचवर्णानीति एवंविधैस्तृणैर्मणिभिश्चो
पशोभितं यावच्छब्दात् मुइंगपुक्खरेइ वा सरतलेइ वा करतलेइ वा आयंसमंडलेइ वेत्यादिसंग्रहः यत्तु कविन्नाण
मणीवण्णेहिं ति पदैः सूचितः स तु संसारे जीवाभिगमादौ व्याख्यानपाठस्यैव दर्शनात् यथा नानानानाविधानेकविधा येस
णां यः कर्बुर्तृणादयस्तेषां नानाविधानि नानावर्णा येषां तानि नानाविधवर्णानीति एवंविधानि यानि तृणानि तैरुपशोभिते
उपशोभितेति तृणानि मणींश्च विशिनष्टि कृत्रिमैरकृत्रिमैश्च विवक्षातो मतुब्लोपार्थो तृणानां जलसेकादिना मणीनां च संस्क
रणादिना कृत्रिमत्वव्यपदेशः अकृत्रिमत्वं तद्वि। लक्षणोल्लेखमात्रमिदमेव तत्रैव सनंतरोक्तेन रूपवर्णनं

एवमेदिहं तणेहिं मणीहिं उवसोहिते॥ सिए तं किंत्तिमेहिं चेव अकिंत्तिमेहिं चेव दाहिणड्ढभ
रहे णं भंते वासे मणुआणं केरिसए आगारभावपडोआरे पण्णत्ते गोयमा तेणं मणुआ बहु
संघयणा

ह्रकबहुले विसमाबहुले खण्डाबहुले इत्यादि। ना सूत्रेण सदा संगतिरित्याशंकनीयं एकस्मिन्नेव
क्षेत्रे सुखासुखकर्माष्टलोककर्षविकल्पप्रदेशभेदे। तत्कालभेदेन च उत्पन्नत्वात् निर्विभागतथा तत्कालावच्छि
न्नेयस्मिन्प्रदेशे विषमं तस्मिन्नेव तत्कालावच्छिन्ने बहुसमरमणीयता स्यात् तत्कालावच्छिन्नेषु भिन्नप्रदेशेषु विषमत्वं स
मत्वं च तु यत्पदपि सर्वजनानुभवसिद्धं तद्विदवक्रबाहियदिह रतक्षेत्रस्यापि सर्वदा सर्वत्र समतैव किन्तु सुषमासुषमादौ भू
मिभागस्य सम एव दुष्षमादुष्षमायां तु विषम एव सुषमदुष्षमादौ तु समस्थलमात्रोपादेशितं तु अथ दक्षिणार्धभरतस्यैव मनुष्य
विषयं प्रश्नमाह दाहिणड्ढेति दक्षिणार्धभरतक्षेत्रे णमिति प्राग्वत् भदंत मनुजानां कीदृश आकारभावप्रत्यवतारः प्रज्ञप्तः गौत
माहे गोतम मनुजा बहुसंहननाः बहूनि संहननानि वज्रर्षभनाराचऋषभनाराच
वरनाराच ५१

चैव अर्धनाराचकीलिकासेवार्त्तलक्षणानि येषां ते तथा एकस्यापि संहननस्यानवस्थितत्वेऽपि संहननानि प्रति
मनुजं भिन्नान्येव दृष्टव्यानि एवंविधाश्च ते मनुजाः कदाचिदेकेन तदनन्तरं कदाचिदेकस्य भेदेन नाना म
कृत्वात् यथासंभवं कमेव सेवार्त्तं पर्यन्तं संपद्यन्ते तु आयुमो मनुष्याणां वेदाद्य संघयणे वह इत्येतद् लिख
तं यावच्च संस्थानानि समचतुरस्रन्यग्रोधसादिकुब्जवामनहुंडलक्षणानि तानि प्रति
नि मनुष्यं भिन्नान्येव एकस्यापि चौरसत्वात् कालभेदस्यापि यथासंभवमेव संस्थानं पर्यन्तं सं
इत्युक्तं आयुषो मनुष्याणां संवासंसं बहु इति तथा बहुतरोच्चत्वादि बहुत्व पर्यायाः उच्चत्वपर्याया
र्यायाः उच्चत्वस्य पर्याया बहुत्वात् पर्यायः इत्यादि समानवयसो मनुज

बहुसंठाणा बहुउच्चत्तपज्जवा ऊवा बहुआउपज्जवा॥

रं नापुच्छचाचायाभिन्नं नंदेवकुर्वादिमनु भवसमता किंतु वैचित्र्यमिति दर्शितं यथा पृच्छचा यावि
कर्म्मकृत्यो पञ्चमस्ते वैविध्यं देवकुर्वादिषु तथापि तत्र वदारपपोना नानात्वं इष्टव्यं उच्चत्वादिपर्याया
पि परमायुर्विपाकिनः संहननादिवत्प्रतिप्राणिनं भिन्ना एव ज्ञेया तथा बहूनि बहुआउरत्यादि बहवोऽन्तर्मुहूर्त्तादारभ्य
पल्योपमत्रयं यावत् संख्येया आयुषः पर्यवा येषां ते तथा युगेन तरतन्तत्रेत्र वर्त्तिनां मनुजानामायुष्योवैचित्र्यं दर्शितं य
नन्तेषां मध्ये कस्यचिदंतर्मुहूर्त्तं कस्यचिन्समयाधिकमित्यादिक्रमेण यावत्कृष्टं त्रिपल्योपमममपि न चैवमायुषो
ऽसंख्येयपर्यवाः संपन्नान्नवसंख्येयानां मनुष्याणां णामसंभविन इतिवेत्नैवं अभिप्रायापरिज्ञानात् यतो भरत
क्षेत्रेऽतीतानागतवर्त्तमानकालवर्त्तिनो मनुजा नाम ध्येकोपि कस्मिंश्चित्पर्यायवर्त्तमानो भवतीत्यविघ्य

ओ॰सू॰

ति चेत्युचिताः येषां ते बोध्यसंख्येयाः अपि पर्यवानां संज्ञा विद्यते ८ अथ तथागतिमाह बहूइं वासाइं ति बहूनि वर्षाणि आउअं परि
पालयंति बहूइं वासाइं मित्यत्र सविभक्तिकत्वात् बहुवचनं तु ल्यादिमध्यमाप्यनानात् पृष्ठमीदारस्य पाव्वत्रात्रा संस्वीकालो प्रदेशा
तो इति वाः अन्यथा गईगता ना महपि मानवानां भ्रियमाणत्वेन बहूइं वासाइं ति वचनस्याधरूपा धस्तात्मा गमहापि यत्र
उक्तं पढ़ता उदायपास ह्रगह्रा वि वयंति माणवा सत्तो उत्पन्नद्वयं दव एवं आउअं यमितु इति एवं निजात्तेः प्रा
लयित्वा समाप्तितीवा अप्पेगइआ निअप्पेगइआ अपि अप्पेकक्काः अपिः समुच्चये एककाः केचित् येषां प्राइत्यो महारंभ परिग्रहार
म्भा कालो साविन्नताः स दावार वज्जिताः पापा । प्रत्ययः पंचेन्द्रियवधादिना रौद्रपरिणामो इध्यवसायता रत्न
मानेः कालेदलिताति नरकादिसंभिन्न बहुनिरय निरयगामी

बहूइं वासाइं आउअं पालेति पालेः । नाअप्पेगइआ निरयगामी अप्पेगइआ तिरिअगामी अप्पेगइआ मणुअगामी

ति नत्र नासर्व यदुक्तं मिच्छद्दिठी महारंभ प विगादोति बहुलोइतिस्थानानिरया
उज्ञेनिबंधइ पावमई रोद्दपरिणामो नि तथा अ प्पेककाः केचिद् ये निज्जर मतिसंवि विकल्पितमार्गपदेशाकाः
अर्हद्रूपदिष्टमार्गनाशकाः मोहात्र पद्मविणः प्रवचनप्रत्यनीकाः नियमितानंताउ वंचिकपायोदयित्वेन महानुत्ताशयाः प
उपार्जितानंत संसारबीज त्वात् ता अप्पेककाः तथा पृढ़दया मायाविनः शढ़शीलाः स शल्याः ते ध्यवसायतारतम्येना
नेकविध्यनि तिर्यगासंपिबद्धा एकेन्द्रियादि तिर्यग्गतिगामिनो भवंति यदुक्तं उम्मगदेसउ मग्गनासउ गढहिअयमाइ
ल्लो सढसीलोअससल्लो तिरिआउं बंधइ जीवोत्ति तथा अप्पेककाः केचित्स्वभावतनाल्पकषायादानरुचयः सदा वारसं
यमविदीनाः मध्यमगुणोपेताः मनुष्याउर्बंधा मनुजगतिगामिनो भवंति यदुक्तं पयईइतणुकसाउ दाणरउ॥

बालसंजमविहूणो मज्झिमगुणेहिं जुत्तो मणुआउं बंधइ जीवोत्ति तथा केचित् अणुव्रतिनो महाव्रतिनो वा बालतपस्वि
